॥ वाल्मीकि रामायण॥

७ उत्तरकाण्ड

अध्याय ८८

वाल्मीकिनैवमुक्तस्तु राघवः प्रत्यभाषत ।
प्राञ्जलिर्जगतो मध्ये दृष्ट्वा तां देववर्णिनीम् ॥ १॥

एवमेतन्महाभाग यथा वदसि धर्मवित् ।
प्रत्ययो हि मम ब्रह्मंस्तव वाक्यैरकल्मषैः ॥ २॥

प्रत्ययो हि पुरा दत्तो वैदेह्या सुरसंनिधौ ।
सेयं लोकभयाद्ब्रह्मन्नपापेत्यभिजानता ।
परित्यक्ता मया सीता तद्भवान्क्षन्तुमर्हति ॥ ३॥

जानामि चेमौ पुत्रौ मे यमजातौ कुशीलवौ ।
शुद्धायां जगतो मध्ये मैथिल्यां प्रीतिरस्तु मे ॥ ४॥

अभिप्रायं तु विज्ञाय रामस्य सुरसत्तमाः ।
पितामहं पुरस्कृत्य सर्व एव समागताः ॥ ५॥

आदित्या वसवो रुद्रा विश्वे देशा मरुद्गणाः ।
अश्विनावृषिगन्धर्वा अप्सराणां गणास्तथा ।
साध्याश्च देवाः सर्वे ते सर्वे च परमर्षयः ॥ ६॥

ततो वायुः शुभः पुण्यो दिव्यगन्धो मनोरमः ।
तं जनौघं सुरश्रेष्ठो ह्लादयामास सर्वतः ॥ ७॥

तदद्भुतमिवाचिन्त्यं निरीक्षन्ते समाहिताः ।
मानवाः सर्वराष्ट्रेभ्यः पूर्वं कृतयुगे यथा ॥ ८॥

सर्वान्समागतान्दृष्ट्वा सीता काषायवासिनी ।
अब्रवीत्प्राञ्जलिर्वाक्यमधोदृष्टिरवान्मुखी ॥ ९॥

यथाहं राघवादन्यं मनसापि न चिन्तये ।
तथा मे माधवी देवी विवरं दातुमर्हति ॥ १०॥

तथा शपन्त्यां वैदेह्यां प्रादुरासीत्तदद्भुतम् ।
भूतलादुत्थितं दिव्यं सिंहासनमनुत्तमम् ॥ ११॥

ध्रियमाणं शिरोभिस्तन्नागैरमितविक्रमैः ।
दिव्यं दिव्येन वपुषा सर्वरत्नविभूषितम् ॥ १२॥

तस्मिंस्तु धरणी देवी बाहुभ्यां गृह्य मैथिलीम् ।
स्वागतेनाभिनन्द्यैनामासने चोपवेषयत् ॥ १३॥

तामासनगतां दृष्ट्वा प्रविशन्तीं रसातलम् ।
पुण्यवृष्टिरविच्छिन्ना दिव्या सीतामवाकिरत् ॥ १४॥

साधुकारश्च सुमहान्देवानां सहसोत्थितः ।
साधु साध्विति वै सीते यस्यास्ते शीलमीदृशम् ॥ १५॥

एवं बहुविधा वाचो ह्यन्तरिक्षगताः सुराः ।
व्याजह्रुर्हृष्टमनसो दृष्ट्वा सीताप्रवेशनम् ॥ १६॥

यज्ञवाटगताश्चापि मुनयः सर्व एव ते ।
राजानश्च नरव्याघ्रा विस्मयान्नोपरेमिरे ॥ १७॥

अन्तरिक्षे च भूमौ च सर्वे स्थावरजङ्गमाः ।
दानवाश्च महाकायाः पाताले पन्नगाधिपाः ॥ १८॥

के चिद्विनेदुः संहृष्टाः के चिद्ध्यानपरायणाः ।
के चिद्रामं निरीक्षन्ते के चित्सीतामचेतनाः ॥ १९॥

सीताप्रवेशनं दृष्ट्वा तेषामासीत्समागमः ।
तं मुहूर्तमिवात्यर्थं सर्वं संमोहितं जगत् ॥ २०॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 26, 1998; Send corrections to sanskrit@cheerful.com